M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 549

Title: Kiratarjuniya (Some pieces)

549

Kirātarjunīyam (I–V.23ab, X VIII–IX)	: **Title**
Bhāravi	: **Author**
	: Editor
	: Year, Vols.
	: Publisher
549	: Remarks

अथ वर्णमैथुनभावा॥ परस्परां तत्त्वज्ञानवान् कीरातमुल ५४९

श्रीगणेशाय नमः॥ श्रियः कुरूणामधिपस्य पालिनीं प्रजासु वृत्तिं यमयुंक्तवे
दितुं॥ सवर्णिलिंगी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः॥१॥ कृतप्रणाम
स्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः॥ न विव्यथे तस्य मनो न हि प्रियं प्रवक्तु
मिछंति मृषा हितैषिणः॥२॥ द्विषां विघाताय विधातुमिच्छतो रहस्यनुज्ञामधिगम्य भू
भृतः॥ स सौष्ठवौदार्यविशेषशालिनीं विनिश्चितार्थामिति वाचमाददे॥३॥ क्रियासु
युक्तैर्नृप चारचक्षुषो न वंचनीयाः प्रभवोनुजीविभिः॥ अतोर्हसि क्षंतुमसाधु साधु
वा हितं मनोहारि च दुर्लभं वचः॥४॥ स किंसखा साधु न शास्ति योधिपं हितान्न यः
संशृणुते स किंप्रभुः॥ सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसंपदः॥५॥
निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जंतवः॥ तवानुभावोयम
वेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषां॥६॥ विशंकमानो भवतः पराभवं न

मादृशपामरजन

निग्रहानुग्रहासमर्थो स्वामी॥ संधिविग्रहयानानि संस्थाप्यासनमेव च॥
द्वैधीभावश्च विज्ञेयाः षड्गुण्यानीति वर्णने

धर्मेण न कृषि येन मित्र मरः दुरोदरो द्यूतकारे पणे द्यूते दुरोदरं इत्यमरः ।। लोकं साधुं समं सदृशे इत्यमरः

कि॰ म॰

पासनरक्षोपि वनाधिवासिनः ।। दुरोदरछद्मजितां समीहते नयेन जेतुं जगतीं सुयोध
नः ।। ७ ।। तथापि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसंपदा यशः ।। समुन्नयन्
१ भूतिमनार्यसंगमाद्वरं विरोधोपि समं महात्मभिः ।। ८ ।। कृतारिषड्वर्गजयेन मानवीम
गम्यरूपां पदवीं प्रपित्सुना ।। विभज्य नक्तंदिवमस्ततंद्रिणा वितन्यते तेन नयेन पौरुषं ।।
९ ।। सखीनिव प्रीतियुजोनुजीविनः समानमानान्सुहृदश्च बंधुभिः ।। स संततं दर्श
यते गतस्मयः कृताधिपत्यामिव साधु बंधुतां ।। १० ।। असक्तमाराधयतो यथायथं वि
भज्य भक्त्या समपक्षपातया ।। गुणानुरागादिव सख्यमीयिवान्न बाधतेस्य त्रिगणः
परस्परं ।। ११ ।। निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियां ।। प्रवर्तते
तस्य विशेषशालिना गुणानुरोधेन विना न सत्क्रिया ।। १२ ।। वसूनि वांछन्न वशी
न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।। गुरूपदिष्टेन रिपौ सुतेपि वा निदं

मन्युर्दैन्ये क्रतौ क्रुधि इत्यमरः सामसांत्वमुभे समे इत्यमरः अत्ययोतिक्रमे ... इत्यमरः

उपायनमुपग्राह्यमुपहारस्तथोपदा इत्यमरः

तिदंडेन स धर्मविप्लवं ।। १३ ।। विधाय रक्षान्परितः परेतरानशंकिताकारमुपैति शं
कितः ।। क्रियापवर्गेष्वनुजीविसात्कृताः कृतज्ञतामस्य वदंति संपदः ।। १४ ।। अनारतं
तेन पदेषु लंभिता विभज्य सम्यग्विनियोगसत्क्रियाः ।। फलंत्युपायाः परिबृंहिताय
तीरुपेत्य संघर्षमिवार्थसंपदः ।। १५ ।। अनेकराजन्यरथाश्वसंकुलं तदीयमास्थाननि
केतनाजिरं ।। नयत्ययुग्मच्छदगंधिरार्द्रतां भृशं नृपोपायनदंतिनां मदः ।। १६ ।। सुखेन
लभ्या दधतः कृषीवलैरकृष्टपच्या इव सस्यसंपदः ।। वितन्वति क्षेममदेवमातृकाश्
चिराय तस्मिन्कुरवश्चकासति ।। १७ ।। उदारकीर्तेरुदयं दयावतः प्रशांतबाधं दि
शतोभिरक्षया ।। स्वयं प्रदुग्धेस्य गुणैरुपस्नुता वसूपमानस्य वसूनि मेदिनी ।। १८ ।।
महौजसो मानधना धनार्चिता धनुर्भृतः संयति लब्धकीर्तयः ।। न संहतास्तस्य न भि
न्नवृत्तयः प्रियाणि वांछंत्यसुभिः समीहितुं ।। १९ ।। महीभुजां सच्चरितैः क्रियाः
चरैः

कुलशीलाभिमान

उदारो दातृमहतोरित्यमरः
वसुर्मयूखाग्निधनाधिपेष्विति विश्वः ।।

कि॰म॰

स्वेदनिःशेषमशेषितक्रियः॥ महोदयैस्तस्य हितानुबंधिभिः प्रतीयते धातुरिवेहितं फलैः॥
२०॥ न तेन सज्यं क्वचिदुद्यतं धनुः कृतं न वा कोपविजिह्ममाननं॥ गुणानुरागेण शिरो
२ भिरुह्यते नराधिपैर्माल्यमिवास्य शासनं॥२१॥ स यौवराज्ये नवयौवनोद्धतं निधा
य दुःशासनमिद्धशासनः॥ मखेष्वखिन्नोनुमतः पुरोधसा धिनोति हव्येन हिरण्य
रेतसं॥२२॥ प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मंडलं भुवः॥
स चिंतयत्येव भियस्त्वदेष्यतीरहो दुरंता बलवद्विरोधिता॥२३॥ कथाप्रसंगेन
जनैरुदाहृतादनुस्मृताखंडलसूनुविक्रमः॥ तवाभिधानाद्व्यथते नताननः
सुदुःसहान्मंत्रपदादिवोरगः॥२४॥ तदाशु कर्तुं त्वयि जिह्ममुद्यते विधीयतां
त्र विधेयमुत्तरं॥ परप्रणीतानि वचांसि चिन्वतां प्रवृत्तिसाराः खलु मादृशां
गिरः॥२५॥ इतीरयित्वा गिरमात्तसत्क्रिये गतेथ पत्यौ वनसंनिवासिनां॥ प्र

विश्य कृष्णासदनं महीभुजा तदाचचक्षेनुजसंनिधौ वचः २६ निशम्य सिद्धिं द्विषताम
पाकृतीस्ततस्ततस्त्या विनियंतुमक्षमा॥ नृपस्य मन्युव्यवसायदीपिनीरुदाजहार द्रुपदा
त्मजा गिरः २७ भवादृशेषु प्रमदाजनोदितं भवत्यधिक्षेप इवानुशासनं॥ तथापि वक्तुं
व्यवसाययंति मां निरस्तनारीसमया दुराधयः २८ अखंडमाखंडलतुल्यधामभिः
श्चिरं धृता भूपतिभिः स्ववंशजैः॥ त्वयात्महस्तेन मही मदच्युता मतंगजेन स्रगिवाप
वर्जिता २९ व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः॥ प्रविश्य हि
घ्नंति शठास्तथाविधानसंवृतांगान्निशिता इवेषवः ३० गुणानुरक्तामनुरक्तसाध
कुलपरंपरया नः कुलाभिमानी कुलजां नराधिपः॥ परस्त्वदन्यः क इवापहारयेन्मनोरमामात्मवधूमि २
वश्रियं ३१ भवंतमेतर्हि मनस्विगर्हिते विवर्तमानं नरदेव वर्त्मनि॥ कथं न मन्युर्ज्वलयत्यु
दीरितः शमीतरुं शुष्कमिवाग्निरुच्छिखः ३२ अवंध्यकोपस्य निहंतुरापदां भवंति वश्याः

एतर्हि संप्रतीदानीमधुना सांप्रतं तथा इत्यमरः

न भ्रूजोयारुभूपारुभुषेत्यमरः

उद्गतशिखमुद्गतज्वालं पाणिनीले आपिशिरवेत्यमरः॥

प्रभूतंप्रचुरंप्राज्यमित्यमरः
समंततस्तुपरितःसर्वतोविष्वगित्यपीत्यमरः ॥ धनिर्वाणेमांतेरुधैर्यंधारणाध्वीरेषुरिपुइतिवि

कि॰सू॰ श्चात्स्वयमेवदेहिनः॥अमर्षशून्येनजनस्यजंतुनानजातहार्देनचविद्विषादरः३३परि
श्रमल्लोहितचंदनोचितःपदातिरंतर्गिरिरेणुरूषितः॥महारथःसत्यधनस्यमानसं
३ दुनोतिनोकच्चिदयंवृकोदरः ३४ विजित्ययःप्राज्यमयच्छदुत्तरान्कुरूनकुप्यंवसुवासवोप
मः॥सवल्कवासांसितवाधुनाहरन्करोतिमन्युंनकथंधनंजयः॥३५ वनांतशय्या
कठिनीकृताकृतीकचाचितौविष्वगिवागजौगजौ॥कथंत्वमेतौधृतिसंयमौयमौविलो
कयन्नुत्सहसेनबाधितुं ३६ इमामहंवेदनतावकींधियंविचित्ररूपाःखलुचित्तवृत्तयः॥
विचिंतयंत्याभवदापदंपरांरुजंतिचेतःप्रसभंममाधयः ३७ पुराधिरूढःशयनंमहा
धनंविबोध्यसेयःस्तुतिगीतिमंगलैः॥अदभ्रदर्भामधिशय्यसस्थलींजहासिनिद्राम
शिवैःशिवारुतैः ३८ पुरोपनीतंनृपरामणीयकंद्विजातिशेषेणयदेतदंधसा॥तदद्यते
वन्यफलाशिनःपरंपरैतिकार्श्यंयशसासमंवपुः ३९ अनारतंयौमणिपीठशायिनाव यि
यमोदंडधरेध्वांक्षेसंयमेयमजेपिचइतिविश्वः

रंजयद्राजशिरस्स्रजांरजः॥निषीदतस्तौचरणौवनेषुतेमृगद्विजालूनशिखेषुबर्हिषां ४०
द्विषन्निमित्तायदियंदशाततःसमूलमुन्मूलयतीवमेमनः॥परैरपर्यासितवीर्यसंपदांपरा
भवोप्युत्सवएवमानिनां ४१ विहायशांतिंनृपधामतत्पुनःप्रसीदसंधेहिवधायविद्विषां॥
व्रजंतिशत्रूनवधूयनिस्पृहाःशमेनसिद्धिंमुनयोनभूभृतः ४२ पुरःसराधामवतांय
शोधनाःसुदुःसहंप्राप्यनिकारमीदृशं॥भवादृशाश्चेदधिकुर्वतेरतिंनिराश्रयाहं
तहतामनस्विता ४३ अथक्षमामेवनिरस्तविक्रमश्चिरायपर्येषिसुखस्यसाधनं॥
विहायलक्ष्मीपतिलक्ष्मकार्मुकंजटाधरःसन्जुहुधीहपावकं ४४ नसमयपरि
रक्षणंक्षमंतेनिकृतिपरेषुपरेषुभूरिधाम्नः॥अरिषुहिविजयार्थिनःक्षितीशा
विदधतिसोपधिसंधिदूषणानि ४५ विधिसमयनियोगाद्दीप्तिसंहारजिह्मंशि
थिलवसुमगाधेमग्नमापत्पयोधौ॥रिपुतिमिरमुदस्योदीयमानंदिनादौदिनकृ
तमिवलक्ष्मीस्त्वांसमभ्येतुभूयः ४६ ॥७ इतिकिरातप्रथमःसर्गः॥ ६७
कपटोस्त्रीव्याजदंभोपधयश्छद्मकैतवेइत्यमरः॥विधिर्विधानेदैवेचेत्यमरः समयाःशपथाचारकालसिद्धांतसंविदइत्यमरः

प्रभूतं प्रचुरं प्राज्यमित्यमरः

तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमंत्रिषु ऋतिविश्वः॥

कि॰ मू॰ २ विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीं॥ उपपत्तिमदूर्जिताश्रयं नृपमूचे
वचनं वृकोदरः १ यदवोचदवेक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा॥ अपि वागधिप
४ स्य दुर्वचं वचनं तद्विदधीत विस्मयं २ विषमोपि विगाह्यते नयः कृततीर्थः पयसामिवा
शयः॥ स तु तत्र विशेषदुर्लभः सदुपन्यस्यति कृत्यवर्त्म यः ३ परिणामसुखे गरीय
सि व्यथकेस्मिन्वचसि क्षतौजसां॥ अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते
गुणः ४ इयमिष्टगुणाय रोचतां रुचिरार्था भवतेपि भारती॥ ननु वक्तृविशे
षनिस्पृहा गुणगृह्या वचने विपश्चितः ५ चतसृष्वपि ते विवेकिनी नृप विद्यासु नि
रूढिमागता॥ कथमेत्य मतिर्विपर्ययं करिणी पंकमिवावसीदति ६ द्विषता
मुदयः सुमेधसा गुरुरस्वंततरः सुमर्षणः॥ न महानपि भूतिमिच्छता फलसंपत्प्र
वणः परिक्षयः ८ अचिरेण परस्य भूयसीं विपरीतां विगणय्य चात्मनः॥ क्षय

पापपुण्यं सुखादि च रसमरः भेषजौषधभैषज्यमित्यमरः पुंसादिलक्षण

आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्च शाश्वती॥
विद्याश्चतस्र एवैता राज्ञो मुख्याः प्रकीर्तिताः॥

संप्रतापः प्रभावश्च यत्तेजः कोशदंडजं इत्यमरः

विधुरं प्रत्यवाये स्यात्कष्टविश्लेषयोरपि अवगीतं च निर्वादे मुहुर्दृष्टे च गर्हिते इति विश्व
स्यादिति वैजयंती

युक्तिमुपेक्षते कृती कुरुते तत्प्रतिकारमन्यथा ९ × विधुरं किमतः परं परैरवगी
तां गमिते दशामिमां॥ अवसीदति यत्सुरैरपि त्वयि संभावितवृत्ति पौरुषं ७ ×
अनुपालयतामुदेष्यतीं प्रभुशक्तिं द्विषतामनीहया॥ अपयांत्यचिरान्महीभुजां जननि
र्वादभयादिव श्रियः १० क्षययुक्तमपि स्वभावजं दधतं धाम शिवं समृद्धये॥ प्रण
मंत्यनपायमुत्थितं प्रतिपच्चंद्रमिव प्रजा नृपं ११ प्रभवः खलु कोशदंडयोः कृ
तपंचांगविनिर्णयो नयः॥ स विधेयपदेषु दक्षतां नियतिं लोक इवानुरुध्यते १२
अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः॥ विनिपातनिवर्तनक्षम
मतमालंबनमात्मपौरुषं १३ विपदोभिभवंत्यविक्रमं रहयत्यापदुपेतमायतिः॥
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः १४ तदलं प्रतिपक्षमुन्न
तेरवलंब्य व्यवसायवंध्यतां॥ निवसंति पराक्रमाश्रया न विषादेन समं समृद्धयः १५

सहायाः साधनोपाया विभागो देशकालयोः॥ विनिपातप्रतीकारः सिद्धिः पंचांगमिष्यते॥ कोशो स्त्री कुड्मले खड्गपिधाने अर्थौघदिव्ययोः इत्यमरः
दंडोस्त्री शासने राज्ञां हिंसायां लगुडे ... इति वैजयंती

सांम्नादानेनभेदेनसमस्तैरुतवापृथक्॥ विजेतुंप्रयतेतारीन्नयुद्धेनकदाचनेति ॥

अवधिस्त्ववधानेस्यात्सीम्निकालबलेपिचेतिविश्वः–

तेजोबलेप्रभावेचधाम्नितिविश्वः चिरतसीतिचेन्नयंती

किरा॰ अथचेदवधिःप्रतीक्ष्यतेकथमाविष्कृतजिह्मवृत्तिना॥धृतराष्ट्रसुतेनसुत्यजा

श्चिरमास्वाद्यनरेंद्रसंपदः १६ द्विषताविहितंत्वयाथवायदिलब्धापुनरात्मनःप

दं॥जननाथतवानुजन्मनांकृतमाविष्कृतपौरुषैर्भुजैः १७ मदसिक्तमुखैर्मृगाधि

५ पःकरिभिर्वर्तयतेस्वयंहतैः॥लघयन्खलुतेजसाजगन्नमहानिच्छतिभूति

मन्यतः १८ अभिमानधनस्यगत्वरैरसुभिःस्थास्नुयशश्चिचीषतः॥अचिरांशुविला

सचंचलाननुलक्ष्मीःफलमानुषंगिकं १९ ज्वलितंनहिरण्यरेतसंचयमास्कंदतिभ

स्मनांजनः॥अभिभूतिभयादसूनतःसुखमुज्झंतिनधाममानिनः २० किमपेक्ष्य

मृगा॰ फलंपयोधरान्ध्वनतःप्रार्थयतेमृगाधिपः॥प्रकृतिःखलुसामहीयसःसहतेना श्री॰

न्यसमुन्नतिंयया २१ कुरुतन्मतिमेवविक्रमेनृपनिर्धूयतमःप्रमादजं॥ध्रुवमेतदवे ५

हिविद्विषांत्वदनुत्साहहताविपत्तयः २२ द्विरदानिवदिग्विभावितान्चतुरस्तोयनि

मनुशास्त्रस्यविस्तरे इत्यमरः

धीनिवायतः॥प्रसहेतरणेतवानुजान्द्विषतांकःशतमन्युतेजसः २३ ज्वलतस्त

वजातवेदसःसततंवैरिकृतस्यचेतसि॥विदधातुशमंशिवेतराःरिपुनारीनयनां

बुसंततिः २४ इतिदर्शितविक्रियंसुतंमरुतःकोपपरीतमानसं॥उपसांत्वयितुंम

हीपतिर्द्विरदंदुष्टमिवोपचक्रमे २५ अपवर्जितविप्लवेशुचौहृदयग्राहिणिमंगला

स्पदे॥विमलातवविस्तरेगिरांमतिरादर्शइवाभिदृश्यते २६ स्फुटतानपदैरपा

कृतानचनस्वीकृतमर्थगौरवं॥रचितापृथगर्थतागिरांनचसामर्थ्यमपोहितं

क्वचित् २७ उपपत्तिरुदाहृताबलादनुमानेननचागमःक्षतः॥इदमीदृगनीदृगा

शयःप्रसभंवक्तुमुपक्रमेतकः २८ अवितृप्ततयातथापिमेहृदयंनिर्णयमेवधा

वति॥अवसाययितुंक्षमाःसुखंनविधेयेषुविशेषसंपदः २९ सहसाविदधीत

नक्रियामविवेकःपरमापदांपदं॥वृणुतेहिविमृश्यकारिणंगुणलुब्धाःस्वयमेवसं

पदः ३०

किरा॰ २ अभिवर्षतियोनुपालयन्विधिबीजानिविवेकवारिणा ॥ ससदाफलशालिनींक्रियांशरदंलोक
इवाधितिष्ठति ३१ शुचिभूषयतिश्रुतंवपुःप्रशमस्तस्यभवत्यलंक्रिया ॥ प्रशमाभरणंपरा
६ क्रमःसनयापादितसिद्धिभूषणः ३२ मतिभेदतमस्तिरोहितेगहनेकृत्यविधौविवेकिनां ॥
सुकृतःपरिशुद्धआगमःकुरुतेदीपइवार्थदर्शनं ३३ स्पृहणीयगुणैर्महात्मभिश्चरिते
वर्त्मनियछतांमनः ॥ विधिहेतुरहेतुरागसांविनिपातोपिसमःसमुन्नतेः ३४ शिवमौप
यिकंगरीयसींफलनिष्पत्तिमदूषितायतिं ॥ विगणय्यनयंतिपौरुषंविजितक्रोधरयाजि
गीषवः ३५ अपनेयमुदेतुमिछतातिमिरंरोषमयंधियापुरः ॥ अभिविद्यनिशा
कृतंतमःप्रभयानांशुमताप्युदीयते ३६ बलवानपिकोपजन्मनस्तमसोनाभि
औ॰कौ॰ली भवंरुणद्धियः ॥ क्षयपक्षइवैंदवीःकलाःसकलाहंतिसशक्तिसंपदः ३७ सम
वृत्तिरुपैतिमार्दवंसमयेयश्चकरोतितिग्मतां ॥ अधितिष्ठतिलोकमोजसासविव

स्वापातिकर लोकस्त्रिभुवनेजने

स्वानिवमेदिनीपतिः ३८ क्वचिरायुपरिग्रहश्रियांक्वचदुष्टेंद्रियवाजिवश्यता ॥ शर
दभ्रचलाश्चलेंद्रियैरसुरक्ष्याहिबहुछलाश्रियः ३९ किमसामयिकंवितन्वतामन
सःक्षोभमुपात्तरंहसः ॥ क्रियतेपतिरुच्चकैरपांभवताधीरतयाधरीकृतः ४० श्रुतमप्य
धिगम्यधेरिपून्विनयंतेनशरीरजन्मनः ॥ जनयंत्यचिरायसंपदामयशस्तेखलुचापला
श्रियं ४१ अतिपातितकालसाधनास्वशरीरेंद्रियवर्गतापिनी ॥ जनवन्नभवंतमक्षमा
नयसिद्धेरपनेतुमर्हसि ४२ उपकारकमायतेर्भृशंप्रसवःकर्मफलस्यभूरिणः ॥ अनपा
यिनिबर्हणंद्विषांनतितिक्षासममस्तिसाधनं ४३ प्रणतिप्रवणान्विहायनःसहजस्नेह
निबद्धचेतसः ॥ प्रणमंतिसदासुयोधनंप्रथमेमानभृतांनवृष्णयः ४४ सुहृदःसहजा
स्तथेतरेमतमेषांनविलंघयंतिये ॥ विनयादिवयापयंतितेधृतराष्ट्रात्मजमात्मसिद्धये ४५
कालातिक्रम

अवधिस्त्ववधानेस्यात्सीम्निकालेबलेपिच इति विश्वः

भि

ग

किरा० अभियोगइमान्महीभुजोभवतातस्यहताः कृतावधेः॥ प्रविघाटयितासमुत्पतन्हरिद
श्वः कमलाकरानिव ४६ उपजापसहान्विलंघयन्सविधातानृपतीन्मदोद्धतः॥ स
२ हतेनजनोपधः क्रियांकिमुतोकाधिकधामराजकं ४७ असमापितकृत्यसंपदां
हतवेगंविनयेनतावता॥ प्रभवंत्यभिमानशालिनांमदमुत्तंभयितुंविभूतयः ४८
मदमानसमुद्धतंनृपंनवियुंक्तेनियमेनमूढता॥ अतिमूढ उदस्यतेनयान्नयहीना
दपरज्यतेजनः ४९ अपरागसमीरणेरितः क्रमशीर्णाकुलमूलसंततिः॥ सुकर
स्तरुवत्सहिष्णुनारिपुरुन्मीलयितुंमहानपि ५० अणुरप्यपहंतिविग्रहान्नप्रमंतः प्र
कृतिप्रकोपजः॥ अखिलंहिहिनस्तिभूधरंतरुशाखांतनिघर्षजोनलः ५१ मति
मान्विनयप्रमाथिनः समुपेक्षेतसमुन्नतिंद्विषः॥ सुजयः खलुताद्दगंतरेविपदंता
ह्यविनीतसंपदः ५२॥ ॥७॥

अंतर्भेदजर्जरं

२१

लघुवृत्तितयाभिदांगतंबहिरंतश्चनृपस्यमंडलं॥ अभिभूयहरत्यनंतरः शिथिलं
कूलमिवापगारयः ५३ अनुशासतमित्यनाकुलंनयवर्त्माकुलमर्जुनाग्रजं॥ स्वयमर्थइ
वाभिवांछितस्तमभीयायपराशरात्मजः ५४ मधुरैरवशानिलंभयन्नपितिर्यंचिशमंनि
रीक्षितैः॥ परितः पटुबिभ्रदेनसांदहनंधामविलोकनक्षमं ५५ युग्मं॥ सहसोपगतः सवि
स्मयंतपसांसूतिरसूतिरेनसां॥ ददृशेजगतीभुजामुनिः सवपुष्मानिवपुण्यसंचयः ५६
अथोच्चकैरासनतः परार्ध्यादुद्यन्सधूतारुणवल्कलाग्रः॥ रराजकीर्णाकपिशांशुजा
लः शृंगात्सुमेरोरिवतिग्मरश्मिः ५७ अथोच्चकैरासनतः परार्ध्यादुद्यन्सधूतारुणवल्क
लाग्रः॥ रराजकीर्णाकपिशांशुजालः शृंगात्सुमेरोरिवतिग्मरश्मिः व्यक्तोदितस्मि
तमयूखविभासितोष्ठस्तिष्ठन्मुनेरभिमुखंसविकीर्णधाम्नः॥ तन्वंतमिद्धमभितोगुरुमंशु
जालंलक्ष्मीमुवाहसकलस्यमृगांकमूर्तेः ५८ इति श्रीकिरा० व्यासागमनंनामद्वितीयः
सर्गः २ अवहितहृदयोविधायसोर्हामृषिवदृषिप्रवरेगुरूपदिष्टां॥ तदनुमतमलंचकारपश्चा
म त्प्रशमइवश्रुतमासनंनरेंद्रः ५९

ततः शरच्चंद्रकराभिरामैरुत्सर्पिभिः प्रांशुमिवांशुजालैः ॥ बिभ्राणमानीलरुचं पिशंगीर्जटा
स्तडित्वंतमिवांबुवाहं १ प्रसादलक्ष्मीं दधतं समग्रां वपुःप्रकर्षेण जनातिगेन ॥ प्रसह्य
 चेतस्सु समासजंतमसंस्तुतानामपि भावमार्द्रं २ अनुद्धताकारतया विविक्तां तन्वंतमंतः
करणस्य वृत्तिं ॥ माधुर्यविस्रंभविशेषभाजा कृतोपसंभाषमिवेक्षितेन ३ धर्मात्मजो धर्म
निबंधिनीनां प्रसूतिमेनःप्रणुदां श्रुतीनां ॥ हेतुं तदभ्यागमने परीप्सुः सुखोपविष्टं मुनि
माबभाषे ४ अनाप्तपुण्योपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ॥ तुल्या भवद्दर्शन
संपदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ अद्य क्रियाः कामदुघाः क्रतूनां सत्याशिषः सं
प्रति भूमिदेवाः ॥ आसंसृतेरस्मि जगत्सु जातस्त्वय्यागते यद्बहुमानपात्रं ६ श्रियं वि
कर्षत्यपहंत्यघानि श्रेयः परिस्नौति तनोति कीर्तिं ॥ संदर्शनं लोकगुरोरमोघं तवात्मयो
नेरिव किं न धत्ते ७ च्योतन्मयूखेपि हिमद्युतौ मे न निर्वृतं निर्वृतिमेति चक्षुः ॥ समुज्झि
तज्ञातिवियोगखेदं त्वत्सन्निधावुच्छ्वसतीव चेतः ८ निरास्पदं प्रश्नकुतूहलित्वमस्मा

स्वधीनं किमु निस्पृहाणां ॥ तथापि कल्याणकरीं गिरं ते मां श्रोतुमिच्छा मुखरीकरो
ति ९ इत्युक्तवानुक्तिविशेषरम्यं मनः समाधाय जयोपपत्तौ ॥ उदारचेता गिरमित्यु
दारां द्वैपायनेनाभिदधे नरेंद्रः १० चिचीषतां जन्मवतामलघ्वीं यशोवतंसामुभयत्र भू
तिं ॥ अभ्यर्हिता बंधुषु तुल्यरूपा वृत्तिर्विशेषेण तपोधनानां ११ तथापि निघ्नं नृप
तावकीनैः प्रह्लादितं मे हृदयं गुणौघैः ॥ वीतस्पृहाणामपि मुक्तिभाजां भवंति भव्ये
षु हि पक्षपाताः १२ सुता न यूयं किमु तस्य राज्ञः सुयोधनं वा न गुणैरतीताः ॥ यस्त्यक्त
वान्वः स वृथा बलाद्वा मोहं विधत्ते विषयाभिलाषः १३ जहातु नैनं कथमर्थसिद्धिः संशय
य्य कर्णादिषु तिष्ठते यः ॥ असाधुयोगा हि जयांतरायाः प्रमाथिनीनां विपदां पदानि १४
पथ्यश्रुतायां समितो रिपूणां धर्म्यां विधानेन धुरं चिराय ॥ त्वया विपत्स्वप्यविपत्तिर
म्यमाविष्कृतं प्रेम परं गुणेषु १५ विधाय विध्वंसमनात्मनीनं शमैकवृत्तेर्भवतः छले

किरा॰३ विधायविध्वंसमनात्मनीनं शमैकवृत्तेर्भवतः छलेन॥ प्रकाशितत्वन्मतिशीलसाराः कृ
तोपकारा इव विद्विषस्ते १५ लभ्याधरित्री तव विक्रमेण ज्यायांश्च वीर्यास्त्रबले
विपक्षः॥ अतः प्रकर्षाय विधिर्विधेयः प्रकर्षतंत्रा हि रणे जयश्रीः॥१६ त्रिः
२ सप्तकृत्वो जगतीपतीनां हंता गुरुर्यस्य स जामदग्न्यः॥ वीर्यावधूतः स्म तदा विवे
द प्रकर्षमाधारवशं गुणानां १७ यस्मिन्ननैश्वर्यकृतव्यलीकः पराभवं प्राप्त
इवांतकोपि॥ धुन्वन्धनुः कस्य रणे न कुर्यात् मनो भयैकप्रवणं स भीष्मः १९ सृ
जंतमाजाविषुसंहतीर्वः सहेत कोपज्वलितं गुरुं कः॥ परिस्फुरल्लोलशिखाग्र
जिह्वं जगज्जिघत्संतमिवांतवह्निं २० निरीक्ष्य संरंभनिरस्तधैर्यं राधेय
माराधितजामदग्न्यं॥ असंस्तुतेषु प्रसभं भयेषु जायेत मृत्योरपि पक्षपातः २१
यया समासादितसाधनेन सुदुश्चरामाचरता तपस्यां॥ एते दुरापं समवा
प्य वीर्यमुन्मूलितारः कपिकेतनेन २२ महत्वयोगाय महामहिम्नामारा

धनीं तां नृप देवतानां॥ दातुं प्रदानोचितभूरिधाम्नीमुपागतः सिद्धिमिवा
स्मि विद्यां २३ युग्मं॥ इत्युक्तवंतं व्रज साधयेति प्रमाणयन्वाक्यमजातशत्रोः॥ प्रसेदि
वांसं तमुपाससाद वसन्निवांते विनयेन जिष्णुः २४ निर्याय विद्याथ दिनादिरम्याद्बिंबादि
वार्कस्य मुखान्महर्षेः॥ पार्थाननं वह्निकणावदाता दीप्तिः स्फुरत्पद्ममिवाभिपेदे २५ भि
योगं च तं योग्यतमाय तस्मै तपःप्रभावाद्वितार सद्यः॥ येनास्य तत्वेषु कृतेवभा
से समुन्मिमीलेव चिराय चक्षुः २६ आकारमाशंसितभूरिलाभं दधानमंतःकर
णानुरूपं॥ नियोजयिष्यन्विजयोदये तं तपःसमाधौ मुनिरित्युवाच २७ अनेन
योगेन विवृद्धतेजा निजां परस्मै पदवीमयच्छन्॥ समाचराचारमुपात्तशस्त्रो जपो
पवासाभिषवैर्मुनीनां २८ करिष्यसे यत्र सुदुश्चराणि प्रसत्तये गोत्रभिदस्तपां
सि॥ शिलोच्चयं चारुशिलोच्चयं तमेषः क्षणान्नेष्यति गुह्यकस्त्वां २९ इति ब्रुवाणेन महे

किरा. द्रस्तुंमहर्षिणातेनतिरोबभूवे॥ तंराजराजानुचरोस्यसाक्षात्प्रदेशमादेशमिवाधितस्थौ ३०
कृतानतिर्व्याहृतसांत्ववादेजातःस्पृहःपुण्यजनःसजिष्णौ॥ इयायसख्याविवसंप्रसादं
१० विश्वासयत्याशुसतांहियोगः ३१ अथोष्णभासेवसुमेरुकुंजान्विहीयमानानुदयायतेन॥
बृहद्द्युतीन्दुःखकृतात्मलाभंतमःशनैःपांडुसुतान्प्रपेदे ३२ असंशयालोचितकार्यनुन्नःप्रे
म्णासमानीयविभज्यमानः॥ तुल्याद्विभागादिवतन्मनोभिर्दुःखातिभारोपिलघुःसमेने ३३
धैर्येणविश्वास्यतयामहर्षेस्तीव्रादरातिप्रभवाच्चमन्योः॥ वीर्यंचविद्वत्सुसुतेमघोनःसु सु
तेषुनस्थानमवापशोकः ३४ नानुरिधाम्नश्चतुरोपिदूरंविहायायामानिववासरस्य॥
एकौघभूतंतदशर्मकृष्णाविभावरीध्वांतमिवाभिपेदे ३ तुषारलेखाकुलितोत्प
लाभेपर्यश्रुणीमंगलभंगभीरुः॥ अगूढभावापिविलोकनेसानलोचनेमीलयितुं
विषेहे ३६ अकृत्रिमप्रेमरसाभिरामंरामार्पितंदृष्टिविलोभिदृष्टं॥ मनःप्रसा
दांजलिनानिकामंजग्राहपाथेयमिवेंद्रसूनुः ३७ धैर्यावसादेनहृतप्रसा

दावन्यद्विपेनेवनिदाघसिंधुः॥ निरुद्धबाष्पोदयसन्नकंठमुवाचकृच्छ्रादितिराजपुत्री ३८
मग्नांद्विषच्छद्मनिपंकभूतेसंभावनांभूतिमिवोद्धरिष्यन्॥ आधिद्विषामातपसांप्रसिद्धे
रस्मद्विनामाभृशमुन्मनोभूः ३ यशोधिगंतुंसुखलिप्सयावामनुष्यसंख्याम
तिवर्तितुंवा॥ निरुत्सुकानामभियोगभाजांसमुत्सुकेवांकमुपैतिसिद्धिः ४० लोकं
विधात्राविहितस्यगोप्तुंक्षत्रस्यमुष्णन्वसुजैत्रमोजः॥ तेजस्वितायाविजयैकवृ
त्तेर्निघ्नन्प्रियंप्राणमिवाभिमानं ४१ ब्रीडानतैराप्तजनोपनीतःसंशय्यकृ
च्छ्रेणनृपःप्रपन्नः॥ वितानभूतंविततंपृथिव्यांयशःसमूहन्निवदिग्विकीर्णं ४२
वीर्यावदानेषुकृतावमर्शस्तन्वन्नभूतामिवसंप्रतीतिं॥ कुर्वन्प्रयामक्षयमा
पत्तीनामर्कत्विषामह्नइवावशेषः ४३ प्रसह्ययोस्मासुपरैःप्रयुक्तोवक्तुंनशक्यः
स्मतु

किरा॰३ किमुताधिकर्तुं॥ नवीकरिष्यत्युपशुष्यदार्द्रः सत्वद्विनामे हृदयंनिकारः ४४ आत्मोभि
मानव्यसनादसह्यं दंतीव दंतव्यसनाद्विकारं॥ द्विषत्प्रतापान्तरितोरुतेजाः शरद्घना
११ कीर्णइवादिरह्नः ४५ सव्रीडमंदैरिव निष्क्रियत्वान्नात्यर्थमस्त्रैरवभासमानः॥ यशः
क्षयात्क्षीणजलार्णवाभस्त्वमन्यमाकारमिवाभिपन्नः ४६ दुःशासनामर्षरजोविकी
र्णैरेभिर्विनाथैरिवभाग्यनाथैः॥ केशैः कदर्थीकृतवीर्यसारः कच्चित्स एवासि धनं
जयस्त्वं ४७ विशेषकं॥ ॥ सक्षत्रियस्त्राणसहः सतां यस्तत्कार्मुकं कर्मसु यस्य शक्तिः॥
वहन्द्वयीमप्यफलेर्थजातं करोत्यसंस्कारहतामिवोक्तिं ४८ वीतौजसः सन्निधिमात्रशे
वै षा भवत्कृतां भूतिमवेक्षमाणाः॥ समानदुःखा इव नस्त्वदीयाः सरूपतां पार्थ गुणा भजं
ते ४९ आक्षिप्यमाणं रिपुभिः प्रमादान्नागैरिवालूनसटं मृगेंद्रं॥ त्वां धूरियं योग्यतयाधि
रूढा दीप्त्या दिनश्रीरिव घर्मरश्मिं ५० करोति यः सर्वजनातिरिक्तां संभावनामर्थ
वतीं क्रियाभिः॥ संसत्सु जातेपुरुषाधिकारे न पूरणीतं समुपैति संख्या ५१॥

प्रियेषु यैः पार्थ विनोपपत्त्या विचिंत्यमानैः क्षममेति चेतः॥ तव प्रयातस्य जयाय तेषां क्रि
यादघानां मघवा विघातं ५२ मा गाश्चिरायैकचरः प्रमादं वसन्नसंबाधशिवेपि देशे॥ मा
त्सर्यरागोपहतात्मनां हि स्खलंति साधुष्वपि मानसानि ५३ तदाशु कुर्वन्वचनं महर्षेर्म
नोरथान्नः सफलीकुरुष्व॥ प्रत्यागतं त्वास्मि कृतार्थमेव स्तनोपपीडं परिरब्धुकामा ५४
उदीरितां तामिति याज्ञसेन्या नवीकृतोद्ग्राहितविप्रकारां॥ आसाद्य वाचं स भृशं दिदी
पेकाष्ठामुदीचीमिव तिग्मरश्मिः ५५ अथाभिपश्यन्निव विद्विषः पुरः पुरोधसारो
२ पितहेतिसंहतिः॥ बभार रम्योपि वपुः स भीषणं गतः क्रियां मंत्र इवाभिचारिकीं ५६
अविलंघ्यविकर्षणं परैः प्रथितज्यारवकर्म कार्मुकं॥ अगतावरिदृष्टिगोचरं शितनि
स्त्रिंशयुजो महेषुधी ५७ यशसेव तिरोदधन्मुहुर्महसा गोत्रभिदायुधक्षतीः॥ कव
चं स सरत्नमुद्वहन्ज्वलितज्योतिरिवांतरं दिवः ५८ अलकाधिपभृत्यदर्शितं शिव

किरा॰स॰३ मुवंधरवर्त्मसंप्रयान्‌॥ हृदयानि समाविवेश सः क्षणमुद्बाष्पदशां तपोभृतां ५९ विशेषकं॥
अनुजगुरथ दिव्यं दुंदुभिध्वानमाशाः सुरकुसुमनिपाते व्योम्नि लक्ष्मीर्वितेने॥ प्रिय
१२ मिव कथयिष्यन्नालिलिंग स्फुरंती भुवमनिभृतवेलावीचिबाहुः पयोधिः ६० इ
ति किरातार्जु॰ धनंजयप्रस्थानं तृतीयः सर्गः॥ ॥ ७॥ ॥ ततः स कूजत्कलहं
समेखलां सपाकसस्याहितपांडुतागुणां॥ उपाससादोपजनं जनप्रियः प्रियामिवा
सादितयौवनां भुवं १ विनम्रशालिप्रसवौघशालिनीरपेतपंकाः ससरोरुहांभ
सः॥ ननंद पश्यन्नुपसीम सस्थलीरुपायनीभूतशरद्गुणश्रियः २ निरीक्ष्यमा
णा इव विस्मयाकुलैः पयोभिरुन्मीलितपद्मलोचनैः॥ हृतप्रियादृष्टिविलास
विभ्रमा मनोस्य जह्रुः शफरीविवृत्तयः ३ तुतोष पश्यन्कलमस्य सोधिकं स
वारिजे वारिणि रामणीयकं॥ सुदुर्लभे नार्हति कोभिनंदितुं प्रकर्षलक्ष्मीमनुरू
पसंगमे ४ नुनोद तस्य स्थलपद्मिनीगतं वितर्कमाविष्कृतफेनसंहतिः॥ अवाप्त १२

किंजल्कविभेदमुच्चकैर्विवृत्तपाठीनपराहतं पयः ५ कृतोर्मिरेखं शिथिलत्वमायता
शनैः शनैः शांतरयेण वारिणा॥ निरीक्ष्य रेमे स समुद्रयोषितां तरंगितक्षौमविपांडुसै
कतं ६ मनोरमं प्रापितमंतरं भ्रुवोरलंकृतं केसररेणुनाणुना॥ अलक्तताम्राधरपल्ल
वश्रिया समानयंतीमिव बंधुजीवकं ७ नवातपालोहितमाहितं मुहुर्महानिवेशौ परितः
पयोधरौ॥ चकासयंतीमरविंदजं रजः परिश्रमांभःपुलकेन सर्पता ८ कपोलसंश्लेषि वि
लोचनत्विषा विभूषयंतीमवतंसकोत्पलं॥ सुतेन पांडोः कलमस्य गोपिकां विलोक्य मेने श
रदः कृतार्थता ९ उपारताः पश्चिमरात्रगोचरादपारयंतः पतितुं जवेन गां॥ समुत्सुका
श्चकुरवेक्षणोत्सुकं गवां गणाः प्रस्नुतपीवरौधसः १० परीतमुक्षावजये जयाश्रिया नदंतमु
च्चैः क्षतसिंधुरोधसं॥ ददर्श पुष्टिं दधतं स शारदीं सविग्रहं दर्पमिवाधिपं गवां॥ ११ विमु
च्यमानैरपि तस्य मंथरं गवां हिमानीविशदैः कदंबकैः॥ शरन्नदीनां पुलिनैः कुतूहलं गले
दुकूले जघनैरिवादधे १२ गतान्पशूनां सहजन्मबंधुतां गृहाश्रयं प्रेमवनेषु बिभ्रतः॥

ददर्शगोपानुपधेनुपांडवः कृतानुकारानिवगोभिरार्जवे १३ परिभ्रमन्मूर्धजषट्पदाकु
लैः स्मितोदयादर्शितदंतकेसरैः ॥ मुखैश्चलत्कुंडलरश्मिरंजितैर्नवातपामृष्टसरो
१३ जचारुभिः १४ निबद्धनिश्वासविकंपिताधरा लता इव प्रस्फुरितैकपल्लवाः ॥ व्य
पोढ[illegible]र्श्वैरपवर्तितत्रिका विकर्षणैः पाणिविहारहारिभिः १५ व्रजाजिरे
ष्वंबुदनादशंकिनीः शिखंडिनामुन्मदयत्सु योषितः ॥ मुहुः प्रणुन्नेषु मथांविवर्तनैर्न
दत्सु कुंभेषु मृदंगमंथरं १६ स[illegible] मंथरावल्गितपीवरस्तनीः परिश्रमक्लां
तविलोचनोत्पलाः ॥ निरीक्षितुं नोपरराम बल्लवीरभिप्रनृत्ता इव वारयोषितः १ नर्तयंती
७ ॥ पपात पूर्वां जहतो विजिह्मतां वृषोपभुक्तांतिकसस्यसंपदः ॥ रथांगसी
मंतितसांद्रकर्दमान्प्रसक्तसंपातपृथूकृतान्पथः १८ जनैरुपग्राममनिंद्यकर्म
भिर्विविक्तभावेंगितभूषणैर्वृताः ॥ भृशं ददर्शाश्रममंडपोपमाः सपुष्पहासाः स
निवेशवीरुधः १९ ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषं ॥

ततः स संप्रेक्ष्य शरद्गुणश्रियं शरद्गुणालोकनलोलचक्षुषं ॥ उवाच यक्षस्तमचोदितोपि
गां न हींगितज्ञोवसरेवसीदति २० इयं शिवाया नियतेरिवायतिः कृतार्थयंती जग
तः फलैः क्रियाः ॥ जयश्रियं पार्थ पृथूकरोतु ते शरत्प्रसन्नांबुरनंबुवारिदा २१ उ
अगम्यरूपत्वे पैति सस्यं परिणामरम्यतां नदीरनौद्धत्यमपंकतां मही ॥ नवैर्गुणैः संप्रति संस्तव
स्थिरं तिरोहितं प्रेम घनागमश्रियः २२ पतंति नास्मिन्विशदाः पतत्रिणो धृतेंद्रचा स्वाभिधेये
पा न पयोदपंक्तयः ॥ तथापि पुष्णाति नभः श्रियं परां न रम्यमाहार्यमपेक्षते गुणं २३ वि
पांडुभिर्म्लानतया पयोधरैश्च्युताचिराभागुणहेमदामभिः ॥ इयं कदंबानिलभर्तुरत्य
ये न दिग्वधूनां कृशता न राजते २४ विहाय वांछामुदिते मदात्ययादरक्तकंठस्य रुते
शिखंडिनः ॥ श्रुतिश्रियस्तुन्मदहंसनिस्वनं गुणाः प्रियत्वेधिकृता न संस्तवाः २५ अ
भीपथुस्तंबभृतः पिशंगतांगता विपाकेन फलस्य शालयः ॥ विकासि वप्रांभसि गंध
सूचितं नमंति निघ्रातुमिवासितोत्पलं २६

ति श्री

बिसबिंदु दिनैर्विर विभेत

कि॰ स॰ ४ मृणालिनीनामनुरंजितंत्विषा विभिन्नमंभोजपलाशशोभया॥ पयस्फुरच्छालिशि
खापिशंगितं द्रुतंधनुःखंडमिवाहिविद्विषः २७ विपांडुसव्यानमिवानिलोद्ध
१४ तं निरुंधतीः सप्तपलाशजंरजः॥ अनाविलोन्मीलितबाणचक्षुषः सपुष्पहासाव
नराजियोषितः २८ अदीपितंवैद्युतजातवेदसा सितांबुदछेदतिरोहितातपं
ततांतरंसांतरवारिसीकरैः शिवंनभोवर्त्म सरोजवायुभिः २९ सितछदा
नापदिश्यधावतांरुतैरमीषांग्रथिताः पतत्रिणां॥ प्रकुर्वते वारिदरोधनि
र्गताः परस्परालापमिवामलादिशः ३० कालोपकं॥ ॥ विहारभू
मेरभिघोषमुत्सुकाः शरीरजेभ्यश्च्युतयूथपंक्तयः॥ असक्तमूधांसिपयः
क्षरंत्यमूरुपायनानीवनयंति धेनवः ३१ जगत्प्रसूतिर्जगदेकपावनी व्रजोप
कंठंतनयैरुपेयुषी॥ द्युतिंसमग्रांसमितिर्गवामसावुपैतिमंत्रैरिवसंहिताहु
तिः ३२

कृतावधानंजितबर्हिणध्वनौ सुरक्तगोपीजनगीतनिःस्वने॥ इदंजिघत्सामपहाय
भूयसींनसस्यमभ्येति मृगीकदंबकं ३३ असावनास्थापरयावधीरितः सरोरु
हिण्याशिरसानमन्नपि॥ उपैतिशुष्यन्कलमःसहांभसा मनोभुवातप्तइवाभिपांडुतां
३४ अमीसमुद्धूतसरोजरेणुना हृताहृतासारकणेनवायुना॥ उपागमेदुश्चरिता
इवापदांगतिंनतिश्चेतुमलंशिलीमुखाः ३५ मुखैरसौविद्रुमभंगलोहितैः शिखाः
पिशंगीः कलमस्यबिभ्रती॥ शुकावलिर्व्यक्तशिरीषकोमला धनुःश्रियंगोत्रभिदोनु
गच्छति ३६ नमतनुवनराजिश्यामितोपत्यकांतं नगमुपरिहिमानीगौरमासाद्यजि
ष्णुः॥ अपगतमदरागस्यानुसस्मारलक्ष्मीमसितमधरवासोबिभ्रतःसीरपाणेः ३८
इतिकथयतितत्रनातिदूरादथददृशेपिहितोष्णरश्मिबिंबः॥ विगलितजलभारशु
क्लभासोनिचयइवांबुमुचांनगाधिराजः॥३७ इतिश्री॰ भा॰ शरद्वर्णनंनामचतुर्थःसर्गः॥
अथजयायनुमेरुमहीभृतोरभसयानुदिगंतदिदृक्षया॥ अभिययौसहिमाचलमुच्छ्रि

कि॰स॰५ तं समुदितं नु विलंघयितुं नभः १ तपनमंडलदीपितमेकतः सततनैशतमोवृतमन्यतः॥
हसितभिन्नतमिस्रचयं पुरः शिवमिवानुगतं गजचर्मणा २ क्षितिनभःसुरलोकनि
१५ वासिभिः कृतनिकेतमदृष्टपरस्परैः॥ प्रथयितुं विभुतामभिनिर्मितं प्रतिनिधिं जगता
मिव शंभुना ३ भुजगराजसितेन नभःश्रिता कनकराजिविराजितसानुना॥ समुदितं
य निचयेन तडित्वतीं लघयता शरदंबुदसंहतिं ४ मणिमयूखचयांशुकभासुराः सुरव
धूपरिभुक्तलतागृहाः॥ दधतमुच्चशिलांतरगोपुराः पुर इवोदितपुष्पवना भुवः ५
अविरतोज्झितवारिविपांडुभिर्विरहितैरचिरद्युतितेजसा॥ उदितपक्षमिवारतनि
स्वनैः पृथुनितंबविलंबिभिरंबुदैः ६ दधतमाकरिभिः करिभिः क्षतैः समवतारसमै
रसमैस्तटैः॥ विविधकामहिता महिताम्भसः स्फुटसरोजवना जवना नदीः ७ रहित
रत्नचयान्न शिलोच्चयानपलताभवना न दरीभुवः॥ विपुलिनांबुरुहा न सरिद्वधूरकु
सुमान्दधतं न महीरुहः ८ व्यथितसिंधुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः॥

निस्संकिकृसिनारीवेंद

फणभृतामभितो विततं ततं दयितरम्यलताबकुलैः कुलैः ९ नवविनिद्रजपाकुसुमत्विषां
द्युतिमतां निकरेण महाश्मनां॥ निहितसांध्यमयूखमिव क्वचिन्निचितकांचनभित्तिषु
सानुषु १० पृथुकदंबकदंबकराजितं ग्रथितमालतमालवनाकुलं॥ लघुतुषारतुषार
जलश्च्युतं धृतसदानसदाननदंतिनं ११ सुरचापमनेकमणिप्रभैरपपयोविशदं हिम
पांडुभिः॥ अविचलं शिखरैरुपबिभ्रतं ध्वनितसूचितमंबुमुचां चयं १२ विकचवारि
रुहं दधतं सरः सकलहंसगणं शुचि मानसं॥ शिवमगात्मजया च कृतेर्ष्यया सकलहं
सगुणं शुचि मानसं १३ ग्रहविमानगणानभितो दिवं ज्वलयतौषधिजेन कृशानुना॥ मु
हुरनुस्मरयंतमनुक्षपं त्रिपुरदाहमुमापतिसेविनः १४ विततसीकरराशिभिरुच्छ्रि
तैरुपलरोधविवर्तिभिरंबुभिः॥ दधतमुन्नतसानुसमुद्धतां धृतसितव्यजना
मिव जाह्नवीं १५ पंचदशभिः कुलकं॥ ॥ अनुचरेण धनाधिपतेरथो नगविलोक
नविस्मितमानसः॥ स जगदे वचनं प्रियमादरान्मुखरतावसरे हि विराजते १६

अविद्यानिर्मुक्त निसनिर्मल ओतुरे कालसमय

कि॰स॰५ अलमेषविलोकितः प्रजानांसहसासंहतिमंहसांविहंतुं॥ घनवर्त्मसहस्रधेवकुर्वन्हिमगौरै
रचलाधिपतेः शिरोभिः १७ इहदुरधिगमैः किंचिदेवागमैस्सततमसुतरंवर्णयंत्यं
तरं॥ अमुमतिविपिनंवेददिग्व्यापिनंपुरुषमिवपरंपद्मयोनिःपरं १८ रुचिरपल्लवपु
१५ ष्पलतागृहेरुपलसज्जलजैर्जलराशिभिः॥ नयतिसंततमुत्सुकतामयंधृतिमती
रुपकांतमपिस्त्रियः १९ सुलभैः सदानयवतायवतानिधिगुह्यकाधिपरमैः परमैः॥
अमुनाधनैः क्षितिभृतातिभृतासमतीत्यभातिजगतीजगती २० अखि[illegible]मिदम
मुष्यगौरीगुरोस्त्रिभुवनमपिनैतिमन्येतुलां॥ अधिवसतिसदायदेनंजनैरविदितविवि
भवोभवानीपतिः २१ वीतजन्मजरसंपरंशुचिब्रह्मणःपदमुपैतुमिच्छता॥ आगमा
द्विततमोपहादितःसंभवंतिमतयोभवच्छिदः २२ दिव्यस्त्रीणांसचरणलाक्षा
रागारागापातेनिपातितपुष्पापीडाः॥ पीडाभाजःकुसुमचिताःसाशंसंशंसंत्य
स्मिन्सुरतविशेषंशय्याः २३ गुणसंपदासमधिगम्यपरंमहिमानमत्रमहितेजगतां॥

तस्मै

श्रीगणेशायनमः॥ अथस्वमायाकृतमंदिरोज्ज्वलंज्वलन्मणिव्योमसदांसनातनं॥ सुरांगना
गोपतिचापगोपुरंपुरंवनानांविजिहीर्षयाजहुः १ यथायथंताःसहितानभश्चरैः
प्रभाभिरुद्भासितशैलवीरुधः॥ वनंविशंत्योवनजायतेक्षणाःक्षणद्युतीनांदधुरेकरू
पतां २ निरंतरस्थूलपयोधरक्रमःप्रवृत्तनिह्रादिविभूषणारवः॥ नितंबिनीनामृशमा
दधेधृतिंनभःप्रयाणादवनौपरिक्रमः ३ घनानिकामंकुसुमानिबिभ्रतःकरप्रचेयान्य
न्यपहायशाखिनः॥ पुरोभिसस्रेसुरसुंदरीजनैर्यथोत्तरेच्छाहिगुणापुकामिनः ४ तनूनख
लक्ष्मारुणपाणिपल्लवाःस्फुरन्नखांशूत्करमंजरीभृतः॥ विलासिनीबाहुलतावनालि
योविलेपनामोदहृताःसिषेविरे ५ निपीयमानस्तवकाशिलीमुखैरशोकयष्टिश्चलबा
लपल्लवा॥ विडंबयंतीददृशेवधूजनैरमंददष्टोष्ठकरावधूननं ६ करौधुनानानवपल्लवा
कृतीवृथाकृथामानिनिमापरिश्रमं॥ उपेयुषीकल्पलताभिशंकयाकथंन्वितस्त्रस्यति
षट्पदावलिः ७ जहीहिकोपंदयितोनुगम्यतांपुरानुशेतेतवचंचलंमनः॥ इतिप्रियंकां
चिदुपैतुमिच्छतींपुरोनुनिन्येनिपुणःसखीजनः ८ अनुनयस्थाने

प्रसादमाचारचित्रदः

नारीकदंशुकग्रंथीनी विस्यादुच्चयोप्यर्कमार्तंडः शरः शबलपीतयोरितिविश्वः

कि॰स॰ समुन्नतैः काशदुकूलशालिभिः परिक्वणत्सारसपंक्तिमेखलैः॥ प्रतीरदेशैः स्वकलत्रचारु
भिर्विभूषिताः कुंजसमुद्रयोषितः ९ विदूरपातेन भिदामुपेयुषः श्च्युताः प्रवाहादभितः प्र
सारिणः॥ प्रियांकशीताः शुचिमौक्तिकत्विषो वनप्रहासाइववारिबिंदवः १० सखीज
१ नंप्रेमगुरूकृतादरं निरीक्ष्यमाणाइवनम्रमूर्तयः॥ स्थिरद्विरेफांजनशारितोदरैर्विकाशि
भिः पुष्पविलोचनैर्लताः ११ उपेयुषीणां बृहतीरधित्यकामनांसिजह्रुः सुरराजयोषि
तां॥ कपोलकाषैः करिणां मदारुणैरुपाहितश्यामरुचश्चचंदनाः १२ कालापं॥ ॥ स्व
गोचरेसत्यपिचित्तहारिणाविलोभमानाः प्रसवेन शाखिनां॥ नभश्चराणामुपकर्तुमिच्छ
तांप्रियाणि चक्रुः प्रणयेन योषितः १३ प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रंदयि
तेन लंभिता॥ नकिंचिदूचे चरणेन केवलं लिलेख बाष्पाकुललोचना भुवं १४ प्रियेपरा
यच्छति वाचमुन्मुखी निबद्धदृष्टिः शिथिलाकुलोच्चया॥ समादधेनांशुकमाहितंवृथा वि १
वेदपुष्पेषुनपाणिपल्लवं १५ सलीलमासक्तलतांतभूषणं समासजंत्याकुसुमावतंस
कं॥ स्तनोपपीडंनुनुदेनितंबिनाघनेनकश्चिज्जघनेन कांतया १६ कलत्रभारेण विलो
लनीविना गलद्दुकूलस्तनशालिनोरसा॥ बलिव्यपायस्फुटरोमराजिना निरायतत्वादुदरेणताम्यता
गंधसारो मलयजो भद्रश्रीश्चंदनोस्त्रियाः इत्यमरः अव्यक्तरागस्त्वरुणः इत्यमरः नामगोत्रकुलंगोत्रं गोत्रस्वधरणीधरे इत्यमरः

विलंबमानाकुलकेशपाशयाकयाचिदाविष्कृतबाहुमूलया॥ तरुप्रसूनान्यपदिश्य
सादरं मनोधिनाथस्यमनः समाददे १८ युग्मं॥ ॥ व्यपोहितुंलोचनतोमुखानिलैरपा
रयंतंकिलपुष्पजंरजः॥ पयोधरेणोरसिकाचिदुन्मनाः प्रियंजघानोन्नतपीवरस्तनी १९
इमान्यमूनीत्यपवर्जिते शनैर्यथाभिरामंकुसुमाग्रपल्लवे॥ विहायनिःसारतयेवभूरुहंप
दंवनश्रीर्वनितासुसंदधे २० प्रवालभंगारुणपाणिपल्लवः परागपांडूकृतपीवरस्तनः॥
महीरुहः पुष्पसुगंधिराददे वपुर्गुणोच्छ्रायमिवांगनाजनः॥ २१ वरोरुभिर्वारणहस्तपीव
रैश्चिरायखिन्नान् नवपल्लवश्रियः॥ समेपियातुंचरणाननीश्वरान्मदादिवप्रस्खलतः प
देपदे २२ विसारिकांचीमणिरश्मिलब्धया मनोहरोच्छ्रायनितंबशोभया॥ स्थितानि
जित्वानवसैकतद्युतिं श्रमातिरिक्तैर्जघनानिगौरवैः २३ समुद्गसत्पंकजकोशकोमलै
रुपाहितश्रीण्युपनीविनाभिभिः॥ दधंतिमध्येषुवलीविभंगिषुस्तनातिभारादुदराणि
नम्रतां २४ समानकांतीनितुषारभूषणैः सरोरुहैरस्फुटपत्रपंक्तिभिः॥ चितानिघ
र्मांबुकणैः समंततोमुखान्यनुत्फुल्लविलोचनानि २५ विनिर्यतीनां मुकरवदंमथरस्तुरी
गनानामनुसानुवर्त्मनः॥ सविस्मयंरूपयतोनभश्चरान्विवेशतत्पूर्वमिवेक्षणादरः २६ ॥७

बे२

कि॰स॰८ कुलकं॥ ॥ अथस्फुरन्मीनविधूतपंकजाविपंकतीरस्खलितोर्मिसंततिः॥ पयोवगाढुंकु
लहंसनादिनीसमाजुहावेववधूः सुरापगा २७ प्रशांतघर्माभिभवः शनैर्विवान्विलासि
नीभ्यः परिमृष्टपंकजः॥ ददौभुजालंबमिवात्तसीकरः स्तरंगमालांतरगोचरोनिलः २८
२ गतैः सहावैः कलहंसविक्रमं कलत्रभारैः पुलिनं नितंबिभिः॥ मुखैः सरोजानि चदीर्घलो
चनैः सुरस्त्रियः साम्यगुणान्निरासिरे २९ विभिन्नपर्यंतगमीनपंक्तयः पुरोवगाढाः स
खिभिर्मरुत्वतः॥ कथंचिदापः सुरसुंदरीजनैर्विषादिभिस्तत्प्रथमंप्रपेदिरे ३० विगाढमा
त्रेरमणीभिरंभसिप्रयत्नसंवाहितपीवरोरुभिः॥ विभिद्यमाना विससारसारसानुदस्य
तीरेषुतरंगसंहतिः ३१ शिलाघनैर्नाकसदामुरःस्थलैर्बृहन्निवेशैश्चवधूपयोधरैः॥
तटांतनीतेनविभिन्नवीचिना रुषेवभेजे कलुषत्वमंभसा ३२ विधूतकेशाः परिलोलि
तस्रजः सुरांगनानां प्रविलुप्तचंदनाः॥ अतिप्रसंगाद्विहितागसोमुहुः प्रकंपमीयुः स २
भयाइवोर्मयः ३३ विपक्षचित्तोन्मथनानखव्रणास्तिरोहिताविभ्रममंडनेनये॥ हृ

तस्यशेषानिवकुंकुमस्यतान्विकत्थनीयान्दधुरन्यथास्त्रियः ३४ प्रियेणसंग्रथ्यविपक्ष
संनिधावुपाहितांवक्षसिपीवरस्तने॥ स्रजंनकाचिद्विजहौजलाविलांवसंतिहिप्रेम्णिगु
णानवस्तुनि ३५ असंशयंन्यस्तमुपांतरक्ततांयदेवरोद्धुंरमणीभिरंजनं॥ हृतेपितस्मिन्स
लिलेनशुक्लतांनिरासरागोनयनेषुनश्रियं ३६ द्युतिंवहंतोवनितावतंसकाहृताः प्रलोभा
दिववेगिभिर्जलैः॥ उपप्लुतास्तत्क्षणशोचनीयतांच्युताधिकाराः सचिवाइवाययुः ३७
विपत्रलेखानिरलक्तकाधराहृतांजनाक्षीरपिबिभ्रतीः श्रियं॥ निरीक्ष्यरामाबुबुधेन
भश्चरैरलंकृतंतद्वपुषैवमंडनं ३८ तथानपूर्वंकृतभूषणादरः प्रियानुरागेणविलासिनीज
नः॥ यथाजलार्द्रोनखमंडनश्रियादहदृष्टीः प्रतिपक्षयोषितां ३९ शुभाननाः सांबुरुहे
षुभीरवोविलोलहाराश्चलफेनपंक्तिषु॥ नितांतगौर्योहृतकुंकुमेष्वलंनलेभिरेताः परभा
गमूर्मिषु ४० ह्रदांभसिव्यस्तवधूकराहतेरवंमृदंगध्वनिधीरमुज्झति॥ मुहुःस्तनैस्ताल
समंसमाददेमनोरमंनृत्तमिवप्रवेपितं ४१ ८

कि॰स॰८ श्रियाहसद्भिः कमलानिसस्मितैरलंकृतांबुः प्रतिमागतैर्मुखैः॥ कृतानुकूल्यासुरराजयोषितांप्र
सादसाफल्यमवापजाह्नवी ४२ परिस्फुरन्मीनविघट्टितोरवः सुरांगनास्त्रासविलोलदृ
२ ष्टयः॥ उपाययुः कंपितपाणिपल्लवाः सखीजनस्यापिविलोकनीयतां ४३ भयादिवा
श्लिष्य झषाहतेंभसि प्रियंमुदानंदयतिस्ममानिनी॥ अकृत्रिमप्रेमरसाहितैर्मनोहरंतिरामाः
कृतकैरपीहितैः ४४ तिरोहितांतानिनितांतमाकुलैरपांविगाहादलकैः प्रसारिभिः॥
ययुर्वधूनांवदनानितुल्यतांद्विरेफवृंदांतरितैः सरोरुहैः ४५ सरोजपत्रेपरिलीनष
ट्पदेविलोलदृष्टेः स्विदमूविलोचने॥ शिरोरुहाः स्विन्नतपक्ष्मसंततेर्द्विरेफवृंदं
निशब्दनिश्चलं ४६ अगूढहासस्फुटदंतकेसरंमुखंस्विदेतद्विकसन्नुपंकजं॥ इतिप्र
लीनांनलिनीवनेसखींविदांबभूवुः सुचिरेणयोषितः ४७ युग्मं॥ ॥ करौधुनानान
वपल्लवाकृतीपयस्यगाधेकिलजातसंभ्रमा॥ सखीषुनिर्वाच्यमधार्ष्ट्यदूषितंप्रि
यांगसंश्लेषमवापमानिनी ४८
मिथ्यामज्जनभयात्

ब
स्तनः
प्रियैः सलीलंकरवारिवारितः प्रवृद्धनिश्वासविकंपिताधरः॥ सविभ्रमाधूतकराग्रप
ल्लवोयथार्थतामापविलासिनीजनः ४९ उदस्यधैर्यंदयितेनसादरंप्रसादिता
याः करवारिवारितं॥ मुखंनिमीलन्नयनंनतभ्रुवः श्रियंसपत्नीवदनादिवाददे ५०
विहस्तपाणिर्विधुतेघनांभसि प्रियेणवध्वामदनार्द्रचेतसः॥ सखीवकांचीपयसाघ
नीकृताबभारवीतोच्चयबंधमंशुकं ५१ निरंजनेसाचिविलोकितंदृशावयावकंः
पल्लु वेपथुरोष्ठपल्लवं॥ ननम्रभ्रुवोमदयतिस्मविग्रहेबलिक्रियाचातिलकंतदास्पदं ५२
प्रियेणसिक्ताचरमंविपक्षतश्चुकोपकाचिन्नतुतोषसांत्वनैः॥ जनस्यरूढप्रण
स्य यचेतसः किमप्यमर्षोनुनयेभृशायते ५३ निमीलदाकेकरलोलचक्षुषांप्रियोपकं
ठकृतगात्रवेपथुः॥ निमज्जतीनांश्वसितोद्धतस्तनःश्रमोनुनासांमदनोनुपप्रथे ५४
इत्थंविदूरस्थवनिताभिरुदस्यमानंपीनस्तनोरुजघनस्थलशालिनीभिः॥ उत्सर्पितोर्मि
चयलंघिततीरदेशमौत्सुक्यनुन्नमिववारिपुरः प्रतस्थे ५५ नीरोत्तरेणमिथुनानि

कि॰स॰८ रथांगनाम्नां निवाविलोलितसरोजवनश्रियस्ताः॥ संरेजिरे स्फुरत्सरिज्जलधौत
हारास्ताराविताननतरस्तलाइवयामवत्यः ५५ संक्रांतचंदनरसाहितवर्णभेदं वि
च्छिन्नभूषणमणिप्रकरांशुचित्रं॥ बद्धोर्मिनाकवनितापरिभुक्तमुक्तं सिंधोर्ब
४ भारसलिलं शयनीयलक्ष्मी ५७
वीक्ष्य रंतुमनसः सुरनारीरात्तचित्रपरिधानविभूषाः॥ तत्प्रियार्थमिव यातुमथा
स्तं भानुमानुपपयोधि ललंबे १ मध्यमोपलनिभे लसदंशावेकतश्च्युतिमुपेयुषि भानौ॥
द्यौरुवाह परिवृत्तिविलोलां हारयष्टिमिव वासरलक्ष्मी २ अंशुपाणिभिरतीव पिपा
सुः पद्मजं मधु भृशं रसयित्वा॥ क्षीबतामिव गतः क्षितिमेष्यल्लोहितं वपुरुवाह
पतंगः ३ गम्यतामुपगते नयनानां लोहितायति सहस्रमरीचौ॥ आससाद
विरहय्य धरित्रीं चक्रवाकहृदयान्यभितापः ४ मुक्तमूललघुरुज्झितपूर्वः
पश्चिमे नभसि संभृतसांद्रः॥ सामिमज्ज[?]विरराजे खिन्नजिह्म इव रश्मिसमूहः ५
कांतदूत्य इव कुंकुमताम्राः सायमंडनमभि त्वरयंत्यः॥ सादरं ददृशिरे वनिताभिः सौध
जालपतिताः रविभासः ६ अग्रसानुषु नितांतपिशंगैर्भूरुहान्मृदुकरैरवलंब्य॥ अ
स्तशैलगहनं नु विवस्वानाविवेश जलधिं नु महीं नु ७ आकुलश्चलपतत्रिकुलाना
मारवैरनुदितौषससंरागः॥ आययावहरिदश्वविपांडुस्तुल्यतां दिनमुखेन दिनांतः ८ आस्थितः स्थगितवारिदपंक्त्या संध्यया गगनपश्चिमभागः॥ सोर्मिविद्रुमवितानविभासा राजितस्य जलधेः श्रियमूहे ९ प्रांजलावपि जने नतमूर्ध्नि प्रेम तत्प्रवणचेतसि हित्वा॥ संध्ययानुविदधे विरमंत्या चापलेन सुजनेतरमैत्री १० औ
षसातपभयादपलीनं वासरच्छविविरामपटीयः॥ संनिपत्य शनकैरिव निम्नादंधकारमुदवाप समानि ११ एकतामिव गतस्य विवेकः कस्यचिन्न महतोप्युपलेभे॥
भास्वता निदधिरे भुवनानामात्मनीव पतितेन विशेषाः १२ इच्छतां सह वधूभिरभेदं यामिनीविरहिणां विहगानां॥ आपुरेव मिथुनानि वियोगं लंघ्यते न खलु कालनियोगः १३ यत्प्रतापमपि सुरवैः अपि [?] नितिकगताः [?]॥ नीसमतेकं
५

मे

कि॰ स॰ ८ ।नतिमुकुलितहर्षपंकजंमुखमिवांबुरुहिण्या १४ रंजितानुविविभास्वबुके
लानामिंदुगगनेस्थगितिंनु । प्रतितानुविषेषु भासिची सं हता नुकचुभास्ताभि
५ नि रेण्य १५ दाविरागिमालनौविकासंपंकजानि रहयंतिविहायाः ।। स्पष्टसरसामिवा
यतानभश्रीर्वकुभिधुतिनिरापहिरसर्वः १६

संकोचं

श्रु

व्यानदेशाशाधरेणविमुक्तः केतकीकुसुमकेसरांभिपांडुः ।। चूर्णमुष्टिरिवलंभितकांतिर्वासव
स्यादिशामंभुसमूहः १७ उज्झतीशुचिमिवांतमिस्रमंतिकं व्रजतितारकराजे ।। दिक्प्रसाद
हे गुणमंडनमूरश्मिहासविशदंमुखमैंद्री १८ नीलनीरजनिभेहिमगोरंवेशैलरुसवपुर्व
सिलभ्मः ।। खेरराजनिपतत्करजालैर्वारिधेःपयसिगागमिवाभः १९ धानिरुंधरीत
नीलघनाभं ध्वांतमुद्यतकरेणपुरस्तात ।। क्षिप्यमाणमसितेतरभासाशंभुनेवगजच
र्मचकासे २० अंतिकांतिकगतेंदुविसृष्टेजिह्मतांजहतिदीधितिजाले ।। निर्गतमिमिर
भारनिरोधादुच्छ्वसित्यिवरराजाहिगंतः २१ दीपयन्नथनभःकिरणौघैःकुंकुमारुणपयोध
रगौरः ।। हेमकुंभइवपूर्वपयोधेरुन्ममज्जशनकेस्तुहिनांशुः २२ लेरवयादिमलविद्रुमशो
दूरीचकार सासंततंतिमिरमिंदुरुदासे ।। दंष्ट्रयाकनककंटकपिंशगयामंडनंभुवइवादिवराहः २३
उद्धतंदुमयविभिन्नतमिस्रांपश्यतिस्मरजनीमवितमः ।। व्यंशुकेस्फुटमुखीमतिजिह्मांव्रीडि
यानववधूमिवलोकः २४ नप्रसादमुचितंगमिताद्यौर्नोधुतंतिमिरमद्रिवनेभ्यः ।। दिक्मुखे
षुनचधामविकीर्णंभूषिताचरजनीहिमभासा २५ मानिनीजनविलोचनपाताल्रुखाष्य

नोत्सारितं

कोपात्कांतं पराङ्मुखप्रसाद्य... कलहांतरिता... नायिका ... शालिभिः॥ शारः शबलता ... स्थितिदिधः
करोपहारयोः पुंसि बलिः ... समरः करो ... पादारम्भः ... शारूतम...

कि·स·९ कलशान्प्रतिगृह्णन्॥ मंदमंदमुदितः प्रययौ खं भीतभीत इव शीतमयूखः २६ क्षिप्य
तः प्रियवधूरुपकर्णं तारकालसितकरस्य हिमांशोः॥ उद्गमल्लीभिरराजत सैमतादृगरागमुव
लोहितरागः २७ प्रेरितः शशधरेण करौघः संहृतान्यपि नुनोदतमांसि॥ क्षीरसिंधु
९ रिव मंदरभिन्नः काननान्यविरलोच्चतरूणि २८ शारतां गमितया शशिपादैश्छाय
याविटपिनां प्रतिपेदे॥ न्यस्तशुक्लबलिचित्रतलाभिस्तुल्यता वसतिवेश्ममहीभिः २९
आलपध्वतिमता सह वध्वा यामिनी विरहिणा विहगेन॥ सेहिरेन किरणा हिमरश्मे
र्दुःखिते मनसि सर्वमसह्यं ३० गंधमुद्धतरजःकणवाही विक्षिपन्विकसतां कुमुदानाम
स्तंकंपया मास आदुधाव परिलीनविहंगा यामिनीमरुदपां वनराजीः ३१ सविधातुमभिषेकमुदासे मन्मथस्य ऊर्ध्वीकृतः
नाप्नोति खलु लसदंशुजलौघैः॥ यामिनीवनितया ततचिह्नः सोत्पलो रजतकुंभ इवेंदुः ३२ तेजसापि रवि
सुनूनमनूनं नासहायमुपयाति जयश्रीः॥ यद्विभुः शशिमयूखसखः सन्नाददे विजयि चा
पमनंगः ३३ सभ्रमनाविरचना हि तथाभेराग तांप्रि कर्यथैरपि धूर्त्यै॥ सन्निकृष्टरतिभिः सुर
दारैः भूषितैरपि विभूषणमीषे ३४

राधेथ कीकृता लज्जायनसः ... नि ... कस्तुरसविकारम ... इत्यनेनात्तिसीधुः सीधुर्नः पानं सीधुपानं सीधुपानेन ... सुराः सीधु ...
... धार्किरोधः

नम्रजोरुरुचिरे रमणीभ्यश्चंदनानि विरहे मदिरा वा॥ साधनेषु हि रतेरुपधत्ते रम्यतां प्रियसमागम
एव ३५ प्रस्थिताभिरधिनाथनिवासं ध्वंसितप्रियसखीवचनाभिः॥ कामिनीभिरपहस्तितधैर्यैः
स्वीकृतः साहयन्नपि मदो वललंबे ३६ कांतवेश्म बहु संदिशतीभिर्यातमेव रतये रमणीभिः॥ मन्मथेन परि
लुप्तमतीनां प्रायशः स्खलितमप्युपकारी ३७ आश्रु कांतमभिसारितवत्या योषितः पुलककरु
३ कपोलं॥ निर्जगाय मुखमिंदुमखंडखंडपत्रतिलकाकृतिकांत्या ३८ उच्यतां स वचनीयमशे
षं नेश्वरे परुषता सखि साध्वी॥ आनयेनमनुनीय कथं वा विप्रियाणि जनयन्ननुनेयः ३९
किं गतेन न हि युक्तमुपैतुं कः प्रियः सुभगमानिनि मानः॥ योषितामिति कथासु समेतैः कामिभि
९ र्बहुरसा धृतिरूहे ४० युग्मं॥ ॥ योषितः पुलकरोधि दधत्या घर्मवारि नवसंगमजन्म॥
कांतवक्षसि बभूव पतंत्या भूषणं लुलितमंडनमेव ४१ सीधुपानविधुरासु निगृह्णन्मानमाशु निर्दलयन्
शिथिलीकृतलज्जः॥ संगतासु दयितैरुपलेभे कामिनीषु मदनो नु मदो नु ४२ द्वारि चक्षुर
धिपाणि कपोले जीवितं त्वयि कुतः कलहोऽस्याः॥ कामिनामिति वचः पुनरुक्तं प्रीतये न
वनयत्वमियाय ४३ सामिलोचनयुगं नमयंती रुंधती दयितवक्षसि पातं॥ सुभ्रुवो जनय
तिस्म विभूषां संगतावुपरराम च लज्जा ४४ ... प्रातय... शोभ... सुभ्रुवो... स्याः
निषेध पातयंती

अपराध- तिरस्कृत निर्गच्छंतं अंतरीयोपसंव्यानपरिधानान्यधोंशुके: अमर:

सव्यलीकमवधीरितखिन्नं प्रस्थितं सपदि कोपपदेन ॥ योषित: सुहृदिव स्मरुणद्धि प्राणनाथमधि
नीधु बाष्पनिपात: ४५ शंकिताय कृतबाष्पनिपातामीर्ष्यया विमुखितां दयिताय ॥ मानिनी
मभिमुखमुखस्थित चित्तां शंसति स्म घनरोमविभेद: ४६ लोलदृष्टि वदनं दयितायाश्चुंबति
प्रियतमे रभसेन ॥ व्रीडया सह विनीवि नितंबादंशुकं शिथिलतामुपपेदे ४७ कीतयागलि
तनीविनिरस्यन्नंतरीयमवलंबितकांचि ॥ मंडलीकृतपृथुस्तनभारं सस्वजे दयितया हृदयेश:
४८ आहृतानखपदै: परिरंभाश्चुंबनानि घनदंतनिपातै: ॥ सौकुमार्यगुणसंभृत
कीर्तिर्वाम एव सुरतेष्वपि काम: ४९ पाणिपल्लवविधूननमंत: सीत्कृतानि नयनार्धनिमेषा:
योषितां रहसि गद्गदवाचामस्त्रतामुपययुर्मदनस्य ५० पातुमाहितरसान्यभिलेषुस्त
र्षयंत्यमृततुल्यरसानि ॥ सस्मितानि वदनानि वधूनां सोत्पलानि च मधूनि युवान: ५१
कांतसंगमपराजितमन्यौ वारुणीरसनशांतविवादे ॥ मानिनीजन उपाहितसंधौ संदधे
धनुषि नेषुमनंग: ५२ कुप्यताशु भवतानतचित्ता: कोपितांश्च वरिवस्यत यून: ॥ इत्यनेकउ
पदेशाइव स्म स्वाद्यसे सुरतिभिर्मधुवार: ५३ भर्तृभि: प्रणयसंभ्रमदत्तां वारुणीमतिर

मधुवारा मधु: क्रमा: अ: संभ्रम: साध्वसेपि स्यात्संवेगादरयोरपीति विश्व:

आक: पिणा कुलिते आत्मा देहे धृतौ जीवे स्वभावे परमात्मनि इति वैजयंती

अनुचर्यार आगत्य विविक्तेरहसि स्मृत इति विश्व:

भर्तृषूपसखि निक्षिपतीनामात्मन: स्फुटमदोधमितानां ॥ व्रीडया विफलया वनितानां नास्थि
तं न विगतहृदयेभ्य: ६५ रुंधती नयनवाक्यविकासं सादितोभयकरापरिरंभे ॥ व्रीडितस्य ल
लितं युवतीनां क्षीबता बहुगुणैरनुजह्रे ६७ योषिदुद्धतमनोभवरागा मानवत्यपि ययौ द
यितांकं ॥ कारयत्यनिभृता गुणदोषे वारुणी खलु रहस्यविभेदं ६८ आहिते नु मधुना मधुरत्वे
चेष्टितस्य गमिते नु विकासं ॥ आबभौ नव इवोद्धतराग: कामिनीष्ववसर: कुसुमेषो: ६९
मा गमन्मदविमूढधियो न: प्रोज्झ्य रंतुमिति शंकितनाथा: ॥ योषितो न मदिरां भृशमीषु:
प्रेमपश्यति भयान्यपदेपि ७० चित्तनिर्वृतिविधायि विविक्तं मन्मथो मधुमद: शशिभास: ॥
दयितं संगमश्च दयितै: स्म नयंति प्रेमकामपि भुवं प्रमदानां ७१ धार्ष्ट्यलंघितयथोचितभूमौ
विजृंभणं निर्दयं विलुलितालकमाल्ये ॥ मानिनीरतविधौ कुसुमेषुर्मत्तमत्त इव विभ्रममाप ७२ शी
धुपानविधुरेषु वधूनां निघ्नतामुपगतेष्विव पुष्णु ॥ ईहितं रतिरसाहितभावं वीतलज्जम
पि कामिषु रेजे ७३ अन्योन्यरक्तमनसामथ बिभ्रतीनां चेतोभुव: सुरससंवासपरतां निदेशं ॥
वैयाधिकध्वनित भावितमाशु भाभासीसहं तत्परिचिताभिमायरात्रि: ७४ निद्रा विनोदित
प्रेमाभिलाषोनुराग: स्नेह: प्रेमरातस्तथा ॥ शृंगारश्चेति संभोगे सप्तावस्था: प्रकीर्तिता: ॥
प्रेमादि दशास्वन्येष्वुत निगदिता अभिलाषक: ॥ रागस्त स्नेहस्तेनेहस्तस्मात्प्रेम ततो रतिः ॥

कषायस्तु वरेनस्त्री निर्यासे रजकादिनि ॥ संवाहनं वाहने प्रिंसारादे रंगमर्दन इति विश्वः ॥

करभा व वपदौरत्नेम धुरे लवणेपि च विश्वः ॥ ४ विमर्द आगामी निशावसाने पवनो संवाने सेवितुमिव

कि० कि० स० ९ नितांतरसितक्षमानामाखानिमगजानिनादिविवोधतानां ॥ रामासु भाविविरहाकुलितासु यूनां

तत्र वर्तामिव समादधिरे रतानि ७५ कांताजनं सुरतखेदनिमीलिताक्षं संवाहितुं समुपया अंगमर्दनं

हेतु निरमर्द मंदं ॥ हर्म्येषु माल्यमदिरापरिभोगगंधानाविश्चकार रजनीपरिवृत्तिवायुः ७६ कर्तुमिव

आमोदवासितचलाधरपल्लवेषु निद्राकषायितविलोचनेषु ॥ व्यामृष्टपत्रति

ककार ५ लकेषु विलासिनीनां शोभां बबंध वदनेषु मदस्य शेषः ७७ गतवति नखलेखालक्ष्यता नगामइति

पीडित ३ मंगरागे समददयितपीताताम्रबिंबाधराणां ॥ विरहविधुरमिष्टा सत्सखीव रवी अंगनानां गतवान

हृदयमवललंबे रात्रिसंभोगलक्ष्मीः ॥ ७८ इति श्रीकिरातार्जुनीये महाकाव्ये भार

विकृतौ संभोगवर्णनो नाम नवमः ९ ॥ श्री ॥ ॥ ॥ श्री ॥ ॥ ७ ॥

धारयामास आलिंगनवियोगेन